श्री विष्णु षट्पदी स्तोत्रं

श्री विष्णु षट्पदी स्तोत्रं

अविनयमपनय विष्णो
दमय मनः शमय विषयमृगतृष्णां |
भूतदयां विस्तारय
तारय संसारसागरतः || 1 ||

दिव्यधुनीमकरंदे
परिमळपरिभोगसच्चिदानंदे |
श्रीपतिपदारविंदे
भवभयखेदच्छिदे वंदे || 2 ||

सत्यपि भेदापगमे
नाथ तवाऽहं न मामकीनस्त्वं |
सामुद्रो हि तरंगः
क्वचन समुद्रो न तारंगः || 3 ||

उद्धृतनग नगभिदनुज
दनुजकुलामित्र मित्रशशिदृष्टे |
दृष्टे भवति प्रभवति
न भवति किं भवतिरस्कारः || 4 ||

मत्स्यादिभिरवतारै-
-रवतारवतावता सदा वसुधां |
परमेश्वर परिपाल्यो
भवता भवतापभीतोऽहं || 5 ||

दामोदर गुणमंदिर
सुंदरवदनारविंद गोविंद |
भवजलधिमथनमंदर
परमं दरमपनय त्वं मे || 6 ||

नारायण करुणामय
शरणं करवाणि तावकौ चरणौ |
इति षट्पदी मदीये
वदनसरोजे सदा वसतु || 7 ||

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविंदभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ षट्पदी स्तोत्रं संपूर्णं |